साहित्य

उपशास्त्री - II तृतीय - पत्रम्
किरातार्जुनीय - महाकाव्यम्
प्रथमः सर्गः

Saathi

Date __/__/__

प्र०(1) - पद्यमिदम् व्याख्येयम् ।
इमामहं वेद न तावकीं धियं विचित्ररूपाः खलु चित्तवृत्तयः ।
विचिन्तयन्त्याः भवदापदं परां रुजन्ति चेतः प्रसभं ममाध्यः ॥

उत्तरम् - प्रसंगः — प्रस्तुतोऽयं श्लोकः महाकवि भारवि विरचितस्य किरातार्जुनीय महाकाव्यस्य प्रथम सर्गात् उद्धृतोऽस्ति ।

प्रस्तुत श्लोके द्रौपदी युधिष्ठिरं प्रति कथयति - विचार शून्या तवेयं मतिः कथंकारं समजनि इति मया ज्ञातुं न पार्यते, यतोहि लोकानां मनोव्यापारा विचित्रप्रकारा भवन्ति किन्तु तवेमां चरमदुर्दशामवलोक्य मम तु आधिर्भिश्चे तो भज्यते । एवं च निर्विकार इव च्यैर्य वहसीति महदाश्चर्यम् ।

व्याख्या — अहं = मैं (द्रौपदी) । इमां = इस । तावकीं = तुम्हारी । धियं = बुद्धि को । न वेद = नहीं समझ पाती । चित्तवृत्तयः = (लोगों की) चित्तवृतियाँ । विचित्ररूपाः खलु = विचित्र प्रकार की होती हैं । परां = अत्यन्त । भवदापदं = आपकी विपत्ति को । विन्तियन्त्याः = सोचती हुई । मम = मेरे, चेतः = चित्त को, आध्यः = मनोव्यथाएँ । प्रसभं = हठात्, रुजन्ति = नष्ट कर रही हैं ।

Renu Devi
24/08/20

राधा उमाकान्त सं० महावि०
सुखसेना, पूर्णिया ।

Page No. ____

साहित्य उपशास्त्री-I तृतीय - पत्रम्
किरातार्जुनीयम् - महाकाव्यम
प्रथमः - सर्गः

Date __/__/____

प्र० (1) - विजित्य यः प्राज्यमयच्छदुत्तरान् कुरूनकुप्यं वसु वासवोपमः ।
स वल्कवासांसि तवाधुनाहरन् करोति मन्युं न कथं धनञ्जयः ॥

उत्तरम् - प्रसंगः - प्रस्तुतोऽयं श्लोकः महाकवि ~~भारवि~~ प्रणीतस्य किरातार्जुनीयमहाकाव्यस्य द्वितीय सर्गात् उद्धृतोऽस्ति । प्रस्तुत श्लोके द्रौपदी युधिष्ठिरं प्रति कथयति

व्याख्या :- वासवोपमः = इन्द्र के सदृश (पराक्रमी) । यः = जो, उत्तरान् कुरून् = उत्तर कुरु नामक देशों को । विजित्य = जीतकर प्राज्यं = प्रचुर । अकुप्यं = असाधारण (सोना चाँदी रत्नादि) वसु = धन (तुम्हें) । अयच्छत् = देता था । स धनञ्जयः = वही अर्जुन । अधुना = इस समय । वल्कवासांसि = वल्कल-रूप वस्त्रों को । आहरन् = लाता हुआ । तव = तुम्हारे । मन्युं = क्रोध को । कथं न करोति = क्यों नहीं उद्दीप्त करता ।

Renu Devi
24/08/20
राधा उमाकान्त सं० महावि० सुखसेना,
पूर्णिया ।

Page No. ____

प्र० (1) - कृताभिमर्शामनुमन्यमानः सुतां त्वया नाम मुनिर्विमान्यः।
मुष्टं प्रतिग्राहयता स्वमर्थं पात्रीकृतो दस्युरिवासि येन।।
दुरध्निरोहिणी व्यापिनो आशा = कामना क्षेत्रं पत्नी
शरीरयोः 'इत्यमरसिंह। क्षेत्रं शरीरे केदारे सिद्धस्थान-
कलत्रयोः। (मेदिनी कोशः)
क्षेत्रभूता स्मृता नारी बीजभूतः स्मृतः पुमान्,
शार्ङ्गरवः - राज्ञो वचनमाकर्ण्य क्रुद्धः शार्ङ्गरवः आह-
मा तावत् = भवदुक्तमिदं विपरीतम। किं तदित्याह--
कृताभिमर्शामिति।
अन्वयः - कृताभिमर्शां सुतां अनुमन्यमानः मुनिः त्वया
विमान्यो नाम मुष्टं स्वमर्थं प्रतिग्राहयता येन (त्वं)
दस्युरिव पात्रीकृतोऽसि
महर्षेः कण्वस्य दुहितरं शकुन्तलाम स्वीकृतवतो दुष्यन्त-
स्योक्तिं निशम्य क्रुद्धः शार्ङ्गरवो ब्रवीति - कृताभिमर्शामि
कृतः = विहितः अभिमर्शः बलात् स्पर्शः बलाद्धरणं
यस्याः सा ताम् कृताभिमर्शां त्वया कृतबलात्कारां
सुतां = शकुन्तलाम अनुमन्यमानः = अनुमोदमान
इयं महिषीत्वेन प्रतिगृह्यतामिति त्वत्समीपं प्रापयन्निव
अत एव मुनिः = महर्षि कण्वः त्वया = भवता विमान्
किम्। अवज्ञेयः किं विमाननीयः न विमाननीय महर्षि
अपितु माननीय एव दस्यु = चौर इव स्वं = निजं मुष्टं =
चोरितम् अर्थं = धनम् शकुन्तलारूपम प्रतिग्राहयता
= तुभ्यं प्रत्यर्पता = दानरूपेन मन्यमानेन येन
कण्वेन अपात्रम् = अयोग्यपालम पात्रं = योग्यः कृतः
विहितः सम्पद्यमान पात्रीकृतः = पात्रत्वं प्रापितो ऽसि

शेष भाग →

Saathi

Date __/__/__

अयं भाव: – स्वस्यानुपस्थितौ स्वानुमतिं विना सरलां स्वां दुहितरं शकुन्तलां स्वेच्छया परिणीय तस्या: शीलं खण्डयितुं ते दस्योरिव आशिष्टव्यवहारमंगीकृत्य चौरायते चोरितं वस्तु प्रयच्छन्निव दण्डभूताय तुभ्यमेव तां समर्पयन् मुनि: त्वया न तिरस्करणीय: यतो हि तेन मुनिना त्वमपात्रभूतोऽपि कन्यादानेन पात्रीकृतोऽसि। तस्मा देनां त्वया तनयां स्वीकृत्य स मुनि: नूनं संमाननीय:। अन्यथा क्रुद्ध काल इव त्वां स विलयं नेष्यतीति भाव:। अत्रोपमा विषयानुप्रासालङ्कारा: उपजातिश्छन्दश्च॥

नोट– अस्मिन् श्लोकस्य प्रसंग: निम्नलिखित: अस्ति। प्रस्तुत श्लोक: महाकवि कालिदास प्रणीतस्य अभिज्ञानशाकुन्तलम नाटयशास्त्रस्य पञ्चमोऽङ्कात् उद्धृतोऽस्ति।

Renu Devi
24/08/20

राधा उमाकांत सं. महावि. सुखसेना पूर्णियाँ

साहित्य    शास्त्री-II

मेघदूत

Date ___/___/___

(1)-प्र०- पद्यमिदम् व्याख्येयम् ।

वापी चास्मिन् मरकतशिलाबद्धसोपानमार्गा
हेमैश्छन्ना विकचकमलैः स्निग्धवैदूर्यनालैः ।
यस्यास्तोये कृतवसतयो मानसं सन्निकृष्टं
नाध्यास्यन्ति व्यपगतशुचस्त्वामपि प्रेक्ष्य हंसाः ॥

उत्तरम्- प्रसंगः- अयं श्लोकः महाकविकालिदासप्रणीतस्य मेघदूतस्य खण्डकाव्यस्योत्तरमेघस्यास्ति । अत्र यक्षः मेघम्प्रति स्वगृहोद्यानस्य वापी महत्वं वर्णयति ।

व्याख्या- अस्मिन् = ममागारे, मरकतशिलाबद्धसोपानमार्गा = गरुत्मतरत्नशिलानिर्मितावतरणपथा, स्निग्धवैदूर्यनालैः मसृणविदूररत्ननालैः हैमैः = सौवर्णैः, विकचकमलैः = विकसितपद्मैः, छन्ना = व्याप्ता, वापी च = दीर्घिका च, अस्तीति शेषः । 'आरोहणं स्यात् सोपानम्' । गरुत्मतं मरकतमश्मगर्भो हरिन्मणिः । वापी तु दीर्घिका । अत्र गुणसम्पन्नवाप्यां निवासरूपनिमित्तोक्त्या उक्त निमित्ता विशेषोक्तिस्तथा लोकातिशयसम्पत्ति वर्णनादुदात्तालंकारः । उभयोरङ्गाङ्गिभावात् संकरालंकारो बोध्यः । मन्दाक्रान्ता छन्दः ।

Renu devi
24/08/20

राधा उमाकान्त सं० महावि० सुखसेना,
पूर्णिया ।

Page No.